योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८६

षडशीतितमः सर्गः ८६

श्रीवसिष्ठ उवाच ।

दिनान्ते स समाधातुं पुनरेव मनो मुनिः ।

विवेश कांचिद्विततां विज्ञातां विन्ध्यकन्दराम् ।। १

तदेवात्मानुसंधानमत्यजन्सममिन्द्रियैः ।

चेतसा कलयामास दृष्टलोकपरावरः ।। २

पूर्वमेवेन्द्रियगणो मया परिहृतः स्फुटम् ।

इदानीं चिन्तया नार्थः पुनर्विततया मम ।। ३

अस्तिनास्तीतिकलनां भङ्क्त्वा मृद्वीं लतामिव ।

शेषं तु बद्धसंस्थानस्तिष्ठाम्यचलश्रृङ्गवत् ।। ४

उदितोऽस्तं गत इव स्वस्तं गत इवोदितः ।

समः समरसाभासस्तिष्ठामि स्वच्छतां गतः ।। ५

प्रबुद्धोऽपि सुषुप्तस्थः सुषुप्तस्थः प्रबुद्धवत् ।

तुर्यमालम्ब्य कायान्तस्तिष्ठामि स्तम्भितस्थितिः ।। ६

स्थितः स्थाणुरिवैकान्ते स्वान्तान्ते सर्वतः स्थिते ।

सत्त्वसामान्यसाम्ये हि तिष्ठाम्यपगतामयः ।। ७

इति संचिन्त्य स ध्याने पुनस्तस्थौ दिनानि षट् ।

ततः प्रबोधमापन्नः क्षणसुप्त इवाध्वगः ।। ८

ततः सिद्धः स भगवान्वीतहव्यो महातपाः ।

विजहार चिरं कालं जीवन्मुक्ततया तदा ।। ९

वस्तु नाभिननन्दासौ निनिन्द न कदाचन ।

न जगाम तथोद्वेगं न च हर्षमवाप सः ।। १०

गच्छतस्तिष्ठतश्चैव तस्यैवमभवद्धृदि ।
विनोदाय विचित्तस्य कथा स्वमनसा सह ।। १२
अव्ययेन्द्रियवर्गेश मनः शमवता त्वया ।
पश्यानन्दसुखं कीदृग्विधमासादितं ततम् ।। १२
एषैवाविरतं तस्मान्नीरागैव दशा त्वया ।
अवलम्ब्या परित्याज्यं चापलं चलतां वर ।। १३
भो भो इन्द्रियचौरा हे हताशा हतनामकाः ।
युष्माकं नायमात्मास्ति न भवन्तस्तथात्मनः ।। १४
व्रजतां वो विनाशांशमाशा वो विफलीकृताः ।
न समर्थाः समाक्रान्तौ भवन्तो भङ्गुराश्रयाः ।। १५
वयमात्मेति यैषा वो बभूव किल वासना ।
तत्त्वविस्मृतिजाता हि दृष्टरज्जुभुजङ्गवत् ।। १६
अनात्मन्यात्मता सैषा सैषा वस्तुन्यवस्तुता ।
अविचारेण वै जाता विचारेण क्षयं गता ।। १७
भवन्तोऽन्ये वयं चान्ये ब्रह्मान्यत्कर्तृतापरा ।
अन्यो भोक्तान्य आदत्ते को दोषः कस्य कीदृशः ।। १८
वनेभ्यो दारु संजातं रज्जवो वेणुचर्मणः ।
वासी चायःफलान्येव तक्षा ग्रासार्थमुद्यतः ।। १९
इत्थं यथेह सामग्र्या स्वशक्तिस्थपदार्थया ।
संपन्ना काकतालीया दृढा वरगृहाकृतिः ।। २०
संपन्नाः काकतालीयात्स्वशक्तिनियतेन्द्रियाः ।
तथैव कलिका लोलं केव कस्यात्र खण्डना ।। २१
विस्मृतिर्विस्मृता दूरं स्मृतिः स्फुटमनुस्मृता ।
सत्सज्जातमसच्चासत्क्षतं क्षीणं स्थितं स्थितम् ।। २२
एवंविधेन भगवान्विचारेण महातपाः ।
सोऽतिष्ठन्मुनिशार्दूलो बहून्वर्षगणानिह ।। २३

अपुनर्भवनायैव यत्र चिन्तान्तमागता ।

मूढता च सुदूरस्था तत्रासाववसत्सदा ।। २४

यथाभूतपदार्थौघदर्शनोत्थमनर्थकम् ।

ध्यानाश्वासनमालम्ब्य सोऽवसत्सुखगः सदा ।। २५

हेयादेयसमासङ्गत्यागादानदृशोः क्षये ।

वीतहव्यमुनेरासीदिच्छानिच्छातिगं मनः ।। २६

विदेहकेवलीभावे सीमन्ते जन्मकर्मणाम् ।

संसारसङ्गसंत्यागरसासवनवेच्छया ।। २७

विवेश स तथैवान्ते सह्याद्रौ हेमकन्दरम् ।

अपुनःसङ्गमायाशु जगज्जालमवेक्ष्य सः ।। २८

बद्धपद्मासनः स्थित्वा तत्रोवाचात्मनात्मनि ।

राग नीरागतां गच्छ द्वेष निर्द्वेषतां व्रज ।। २९

भवद्भ्यां सुचिरं कालमिह प्रक्रीडितं मया ।

भोगा नमोस्तु युष्मभ्यं जन्म कोटिशतान्यहम्।।३०

भवद्भिर्लालितो लोके लालकैरिव बालकः ।

इमामपि परां पुण्यां निर्वाणपदवीमहम् ।। ३१

येन विस्मारितस्तस्मै सुखायास्तु नमो नमः ।

त्वदुत्तप्तेन हे दुःख मयात्मान्विष्ट आदरात् ।। ३२

तस्मात्त्वदुपदिष्टोऽयं मार्गो मम नमोऽस्तु ते ।

त्वत्प्रसादेन लब्धेयं शीतला पदवी मया ।। ३३

दुःखनाम्ने दुःखतत्त्व सुखदात्मन्नमोस्तु ते ।

कल्याणमस्तु ते मित्र संसारासारजीवित ।। ३४

देह स्थितिरियं यामो वयमात्मीयमास्पदम् ।

प्रयोजनानां जन्तूनामहो नु विषमा गतिः ।। ३५

देहेनापि वियुज्येऽहं भूत्वा जन्मशतान्यपि ।

मित्रकाय मया यत्त्वं त्यज्यसे चिरबान्धवः ।। ३६

त्वयैवात्मन्युपानीता सात्मज्ञानवशात्क्षतिः ।

अधिगम्यात्मविज्ञानमात्मनाशः कृतस्त्वया ।। ३७

देह नान्येन भग्नोऽसि त्वयैवैतदुपासितम् ।

एकाकिन्यापि शुष्यन्त्या प्रशान्ते मयि दीनया ।। ३८

त्वया दुःखं न कर्तव्यं मातस्तृष्णे व्रजाम्यहम् ।

क्षन्तव्याः काम भगवन्विपरीतापराधजाः ।। ३९

दोषा उपशमैकान्तं व्रजाम्यादिश मङ्गलम् ।

चिराच्चिराय चेदानीमम्ब तृष्णे किलावयोः ।। ४०

वियोगो योगदोषेण प्रणामोऽयं स पश्चिमः ।

नमः सुकृतदेवाय भवतेऽस्तु त्वया पुरा ।। ४१

नरकेभ्यः समुत्तार्य स्वर्गेऽहमभियोजितः ।

कुकार्यक्षेत्ररूढाय नरकस्कन्धवाहिने ।। ४२

शासनापुष्पभाराय नमो दुष्कृतशाखिने ।

येन सार्धं चिरं बह्व्यो भुक्ताः प्राकृतयोनयः ।। ४३

अद्यप्रभृत्यदृश्याय तस्मै मोहात्मने नमः ।।

प्रध्वनद्वंशमधुरवचसे पत्रवाससे ।। ४४

नमो गुहातपस्विन्यै वयस्यायै समाधिषु ।

संसाराध्वनि खिन्नस्य त्वं ममाश्वासकारणम् ।। ४५

आसीर्वयस्या सुस्निग्धा सर्वलोभापहारिणी ।

सर्वसंकटखिन्नेन दोषेभ्यो द्रवता मया ।। ४६

त्वमेका शोकनाशार्थमाश्रिता परमा सखी ।

संकटावटकुञ्जेषु हस्तालम्बनदायिने ।। ४७

वार्धकैकान्तसुहृदे दण्डकाष्ठाय ते नमः ।

अस्थिपञ्जरमात्मीयं तथा रक्तान्त्रतन्तुकम् ।। ४८

एतावन्मात्रसारैकं गृहीत्वा गच्छ देहक ।

पयःक्षोभप्रकारेभ्यः स्नानेभ्योऽपि नमोस्तु ते ।। ४९

नमोस्तु व्यवहारेभ्यः संसृतिभ्यो नमोस्तु ते ।

एते भवन्तः सहजाः प्राक्तनाः सुहृदो मया ।। ५०

क्रमेणाद्योत्कृताः प्राणाः स्वस्ति वोऽस्तु व्रजाम्यहम् ।

भवद्भिः सह चित्रासु मया बह्वीषु योनिषु ।। ५१

विश्रान्तं गिरिकुञ्जेषु श्रान्तं लोकान्तरेषु च ।

क्रीडितं पुरपीठान्तरुषितं पर्वतेषु च ।। ५२

स्थितं कार्यविलासेषु प्रस्थितं विविधाध्वसु ।

न तदस्ति जगत्कोशे भवद्भिः सह यन्मया ।। ५३

न कृतं न हृतं यातं न दत्तं नावलम्बितम् ।

इदानीं स्वां दिशं यान्तु भवन्तो याम्यहं प्रियाः ।। ५४

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।

संयोगा विप्रयोगान्ताः सर्वे संसारवर्त्मनि ।। ५५

अयं चाक्षुष आलोको विशत्वादित्यमण्डलम् ।।

विशन्तु वनपुष्पाणि सौगन्ध्यानन्दसंविदः ।। ५६

प्राणानिलस्तथा स्पन्दं विशत्वद्य प्रभञ्जनम् ।

विशन्त्वाकाशकुहरं शब्दश्रवणशक्तयः ।। ५७

इन्दुमण्डलमायान्तु रसनारसशक्तयः ।

निर्मन्दर इवाम्भोधिर्गतार्क इव वासरः ।। ५८

शरदीव घनः स्वैरं प्राप्तः कल्पान्तसर्गवत् ।

ओंकारान्ते स्वमननं प्रशाम्याम्यात्मनात्मनि ।

दग्धेन्धन इवार्चिष्मान्निःस्नेह इव दीपकः ।। ५९

व्यपगताखिलकार्यपरम्परः

सकलदृश्यदशातिगतस्थितिः ।

प्रणवशान्त्यनुसंसृतिशान्तधी-

र्विगतमोहमलोऽयमहं स्थितः ।। ६०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे इन्द्रियवर्गनिराकरणोपदेशो नाम

षडशीतितमः सर्गः ।। ८६